# Shri Ganesha Ashtottarashata Nama Stotram 6

# શ્રીગણેશાષ્ટોત્તરશતનામસ્તોત્રમ્ ૬

## Document Information

Text title : Shri Ganesha Ashtottarashata Nama Stotram 6

File name : gaNeshAShTottarashatanAmastotram6.itx

Category : ganesha, aShTottarashatanAma, stotra

Location : doc_ganesha

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 2. See corresonding nAmAvalI

Latest update : August 16, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 16, 2026

*sanskritdocuments.org*

Shri Ganesha Ashtottarashata Nama Stotram 6

# શ્રીગણેશાષ્ટોત્તરશતનામસ્તોત્રમ્ ૬

સૂર્ય ઉવાચ -
ઇક્ષુસાગરમધ્યસ્થો નિજલોકનિવાસકૃત્ ।
સ્વાનન્દભવનાધીશો નિજાનન્દગૃહસ્થિતઃ ॥ ૧॥

ચિન્તામણિમણ્ટપસ્થો દિવ્યસિંહાસનાશ્રયઃ ।
પદ્મકિઞ્જલ્કસંવિષ્ટઃ સ્વયઞ્જ્યોતિસ્સ્વરૂપવાન્ ॥ ૨॥

તીવ્રાશિરોધૃતપદો જ્વાલિનીમૌલિલાલિતઃ ।
નન્દાનન્દિતપીઠશ્રીઃ ભોગદાભૂષિતાસનઃ ॥ ૩॥

સકામદાયિનીપીઠઃ સ્ફુરદુગ્રાસનાશ્રયઃ ।
તેજોવતીશિરોરત્નં સત્યાનિત્યાવતંસિતઃ ॥ ૪॥

સવિઘ્નનાશિનીપીઠઃ સર્વશક્ત્યમ્બુજે સ્થિતઃ ।
જ્યોતિર્મધ્યે સુખાસીનઃ તત્ત્વમ્પદસુવિગ્રહઃ ॥ ૫॥

જપાકુસુમસઙ્કાશઃ શુણ્ડાદણ્ડવિરાજિતઃ ।
ગજાનનો બ્રહ્મમૂર્દ્ધા જગદ્દેહશ્શુચિસ્મિતઃ ॥ ૬॥

કુટિલાલકશોભાઢ્યઃ સોમસૂર્યાગ્નિલોચનઃ ।
ફાલચન્દ્રશ્શૂર્પકર્ણો દન્તદ્વયવિરાજિતઃ ॥ ૭॥

સ્તબકાકારકુમ્ભાગ્રો લમ્બોષ્ઠો લમ્બનાસિકઃ ।
હ્રસ્વનેત્રત્રયો લમ્બકર્ણો નિબિડમસ્તકઃ ॥ ૮॥

કમ્બુકણ્ઠો બૃહદ્બાહુઃ પીનવક્ષાઃ પિચણ્ડિલઃ ।
નિમ્નનાભિશ્ચતુર્બાહુઃ સ્થૂલોરુઃ પ્રોન્નમત્કટિઃ ॥ ૯॥

શ્લિષ્ટજાનુઃ પીનજઙ્ઘઃ પદ્મપાદદ્વયાન્વિતઃ ।
ઉન્નતપ્રપદો ગૂઢગુલ્ફસ્સંવૃતપાર્ષ્ણિકઃ ॥ ૧૦॥

રક્તવસ્ત્રધરઃ પીતરક્તવસ્ત્રોત્તરીયકઃ ।

હેમતન્તુસમુદ્ભૂતબ્રહ્મસૂત્રત્રયાન્વિતઃ ॥ ૧૧॥

ભાનુકોટિપ્રતીકાશરત્નમૌલિવિરાજિતઃ ।
રત્નકુણ્ડલશોભાઢ્યઃ શૂર્પશ્રુતિવિભૂષણઃ ॥ ૧૨॥

દન્તાલઙ્કારસંયુક્તઃ ફાલપટ્ટવિરાજિતઃ ।
ચિન્તામણીરત્નમયકેયૂરકટકાન્વિતઃ ॥ ૧૩॥

ચિન્તામણીસુરચિતરાજમુદ્રાઙ્ગુલીયકઃ ।
ચિન્તામણીકણ્ઠભૂષો રત્નહારસમન્વિતઃ ॥ ૧૪॥

ચિન્તામણ્યગ્રસંયુક્તકટિસૂત્રવિરાજિતઃ ।
શિઞ્જાનમણિમઞ્જીરરત્નપાદુકસંયુતઃ ॥ ૧૫॥

દૂર્વાશમ્યર્કમન્દારકુસુમૈસ્સુવિરાજિતઃ ।
સર્વાભરણશોભાઢ્યઃ સુગન્ધતિલકોજ્જ્વલઃ ॥ ૧૬॥

રક્તગન્ધવિલિપ્તાઙ્ગો રક્તમન્દારમાલિકઃ ।
પાશાઙ્કુશપરશૂનાં ધારકઃ પદ્મધારકઃ ॥ ૧૭॥

પુષ્કરસ્થસ્વર્ણઘટીપૂર્ણરત્નાભિવર્ષકઃ ।
સ્મિતવક્ત્રસ્સુન્દરાઙ્ગો મૃદુમઞ્જુલભાષકઃ ॥ ૧૮॥

શ્વેતાતપત્રરુચિરઃ શ્વેતચામરવીજિતઃ ।
મહાસિદ્ધિમહાબુદ્ધિશોભિપાર્શ્વદ્વયાન્વિતઃ ॥ ૧૯॥

ગકારમસ્તકોપેતો ણકારજઠરાન્વિતઃ ।
ઈશપાદદ્વયયુતો નિર્ગુણબ્રહ્મવક્ત્રકઃ ॥ ૨૦॥

સગુણબ્રહ્મદેહાઢ્યો નિજાનન્દકલેબરઃ ।
સમષ્ટિવ્યષ્ટિસંજ્ઞાઢ્યબ્રહ્મકુમ્ભસ્થલાન્વિતઃ ॥ ૨૧॥

ત્રયીમયનેત્રધરો મહાકારણશુણ્ડકઃ ।
બિન્દુકણ્ઠસ્સાઙ્ખ્યકર્ણઃ ચતુર્બ્રહ્મભુજાન્વિતઃ ॥ ૨૨॥

જીવબ્રહ્મપાદયુતઃ સોઽહમ્બ્રહ્મવિષાણવાન્ ।
ભુક્તિમુક્તિરૂપચિન્તામણિભૂષણભૂષિતઃ ॥ ૨૩॥

ગણેશ્વરો ગણક્રીડો ગણનાથો ગણાધિપઃ ।
વક્રતુણ્ડશ્ચૈકરદો ગજવક્ત્રો મહોદરઃ ॥ ૨૪॥

લમ્બોદરો ધૂમ્રવર્ણો વિકટો વિઘ્નનાયકઃ ।
વિનાયકો મહાવાક્યલભ્યયોગસુખાત્મકઃ ॥ ૨૫॥

ઇદમષ્ટોત્તરશતં નામ્નાં ગણકકીર્તિતમ્ ।
યઃ પઠેદ્ભક્તિભાવેન ભુક્તિં મુક્તિં લભેન્નરઃ ॥ ૨૬॥

યઃ પૂજયેદનેનૈવ સ્વાનન્દેશગજાનનમ્ ।
દૂર્વાઙ્કુરૈશ્શમીપત્રૈઃ શ્વેતાર્કકુસુમૈશ્ચ વા ॥ ૨૭॥

મન્દારકુસુમૈર્વાપિ પુષ્પૈરન્યૈશ્શુભાક્ષતૈઃ ।
સમ્પ્રાપ્ય વિપુલાન્ ભોગાનન્તે બ્રહ્મપદં બ્રજેત્ ॥ ૨૮॥

ઇતિ શ્રીગણેશાષ્ટોત્તરશતનામસ્તોત્રં (૬) સમ્પૂર્ણમ્ ।

Proofread by Narendran Madathil

---

*Shri Ganesha Ashtottarashata Nama Stotram 6*

pdf was typeset on August 16, 2026

Please send corrections to *sanskrit@cheerful.com*